९गोरोचनायां १०बालायां ११गैरिके च स्त्री शब्दच० ।

**रामायण** न०। रामस्यायनं चरितमधिकृत्य कृतो ग्रन्थोऽण् । रामचरितप्रतिपादके वाल्मीकिकृते महाकाव्यभेदे तच्च सप्तकाण्डात्मकम् ब्रह्मलोके कोटिश्लोकात्मकं मनुष्यलोके च चतुर्विंशतिसाहस्रं पञ्चशतसर्गयुतम् ।

तत्प्रतिपाद्यविषयाश्च गरु०पु० १४८ अ० उक्ता यथा "मनोरिक्ष्वाकुवंश्योऽभूद् वंशे राजा रघुः स्मृतः । रघोरजस्ततो जातो राजा दशरथो बली । तस्य पुत्रास्तु चत्वारो महाबलपराक्रमाः । कौशल्यायामभूद्रामो भरतः केकयीसुतः । सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः । रामो भक्तः पितृमातृर्विश्वामित्रादवाप्तवान् । अस्त्रग्रामं यतो यज्ञे ताड़कां प्रजघान ह । विश्वामित्रस्य यज्ञे तु सुबाहुं न्यवधीद्बली । जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् । ऊर्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् । शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च ते । पित्रादिभिरयोध्यायां गत्वा रामादयः स्थिताः । युधाजित्तं मातुलञ्च शत्रुघ्नभरतौ गतौ । गतयोश्चैवमेवं च राज्यं दातुं समुद्यतम् । रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा । चतुर्दश समावासो वने रामस्य वाञ्छितः । रामः पितृहितार्थन्तु लक्ष्मणेन च सीतया । राज्यं च तृणवत् त्यक्त्वा शृङ्गवेरपुरं गतः । रथं त्यक्त्वा प्रयागञ्च चित्रकूटं गिरिं गतः । रामस्य तु वियोगेन राजा स्वर्गं समाश्रितः । संस्कृत्य भरतश्चागात् रामं भ्रातृगणान्वितः । अयोध्यान्तु समागत्य राज्यं कुरु महामते ! । स नैच्छत् पादुके दत्त्वा राज्याय भरताय तु । विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् । नन्दिग्रामे स्थितो भक्तो ह्ययोध्यां नाविशद् व्रती । रामोऽपि चित्रकूटाच्च अत्रेराश्रममाययौ । नत्वा सुतीक्ष्णं चागस्त्यं दण्डकारण्यमागतः । तत्र शूर्पणखा नाम राक्षसी सहसागता । निकृत्य कर्णौ नासे च रामेणाथ पराहिता । तत्प्रेरितः खरश्चागाद्दूषणस्त्रिशिरास्तथा । चतुर्दशसहस्रेण रक्षसान्तु बलेन च । रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च तान् । राक्षसा प्रेरितोऽभ्यागात् रावणो हरणाय हि । मृगरूपं स मारीचं कृत्वाग्रेऽथ त्रिदण्डधृक् । सीतया प्रेरितो रामो मारीचं प्रजघान ह । म्रियमाणः स च प्राह हा सीते ! लक्ष्मणेति च । सीतोक्तो लक्ष्मणोऽयागाद्रामपार्श्वं ददर्श तम् । उवाच राक्षसी माया नूनं सीता हृतेति सा । रावणोऽन्तरमासाद्य अङ्केनादाय जानकीम् । जटायुषं विनिर्जित्य ययौ लङ्कां ततो बली । अशोकवृक्षच्छायायां रक्षितां तामधारयत् । आगत्य रामः शून्याञ्च पर्णशालां ददर्श ह । शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः । जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् । गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः । सप्ततालान् विनिर्भिद्य किष्किन्ध्यायां हरीश्वरम् । सुग्रीवं कृतवान् राम ऋष्यमूके स्वयं स्थितः । सुग्रीवः प्रेषयामास वानरान् पर्वतोपमान् । सीताया मार्गणं कर्त्तुं पूर्वादौ सुमहाबलान् । प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः । दक्षिणान्तु दिशं ये च मार्गयन्तोऽथ जानकीम् । वनानि पर्वतान् द्वीपान् नदीनां पुलिनानि च । जानकीं ते ह्यपश्यन्तो मरणे कृतनिश्चयाः । सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः । शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् । अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् । भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा । भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् । अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् । रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ! । अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति । तत् श्रुत्वा प्रददौ सीता वेणीरत्नं हनूमते । यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते । तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् । हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागतः । स्वैरिन्द्रजितो बाणैर्दृष्ट्वा रावणमब्रवीत् । रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम् । एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् । कपिर्ज्वलितलाङ्गूलो लङ्कां देहे महाबलः । दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानरः । जग्ध्वा फलं मधुवने दृष्टा सीतेत्यवेदयत् । मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् । ससुग्रीवः सहनुमानङ्गदाद्यैः सलक्ष्मणः । विभीषणोऽपि संप्राप्तः शरणं राघवं प्रति । लङ्कैश्वर्य्ये ह्यभ्यषिञ्चद्रामस्तं रावणानुजम् । रामो नलेन सेतुञ्च कृत्वाब्धौ चोत्तीर्णतायतम् । सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह । अथ ते वानरा वीरा नीलाङ्गदनलादयः । धूम्रधूम्राक्षधूम्रेन्द्राजाम्बवत्प्रमुखास्तदा । मैन्द-द्विविदमुख्यास्ते पुरीं लङ्कां बभञ्जिरे । राक्षसांश्च महाकायान् कालाञ्जनचयोपमान् । रामः सलक्ष्मणो हत्वा सकपिः सर्वराक्षसान् । विद्युज्जिह्वञ्च धूम्राक्षं देवा-